শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরিঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একোনত্রিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একোনত্রিংশং দশকম্॥

## দেৱানামমৃতোপলব্ধিপ্রকারৱর্ণনম্

উদ্গচ্ছতস্তৱ করাদমৃতং হরৎসু
    দৈত্যেষু তানশরণাননুনীয দেৱান্।
সদ্যস্তিরোদধিথ দেৱ ভৱৎপ্রভাৱা -
    দুদ্যৎস্বযূথ্যকলহা দিতিজা বভূৱুঃ॥ **29.1**॥

শ্যামাং রুচাঽপি ৱযসাঽপি তনুং তদানীং
    প্রাপ্তোঽসি তুঙ্গকুচমণ্ডলভঙ্গুরাং ৎৱম্।
পীযূষকুম্ভকলহং পরিমুচ্য সর্ৱে
    তৃষ্ণাকুলাঃ প্রতিযযুস্ত্ৱদুরোজকুম্ভে॥ **29.2**॥

কা ৎৱং মৃগাক্ষি ৱিভজস্ৱ সুধামিমামি -
    ত্যারূঢরাগৱিৱশানভিযাচতোঽমূন্।
ৱিশ্ৱস্যতে মযি কথং কুলটাঽস্মি দৈত্যা
    ইত্যালপন্নপি সুৱিশ্ৱসিতানতানীঃ॥ **29.3**॥

মোদাৎ সুধাকলশমেষু দদৎসু সা ৎৱং
    দুশ্চেষ্টিতং মম সহধ্ৱমিতি ব্রুৱাণা।
পঙ্ক্তিপ্রভেদৱিনিৱেশিতদেৱদৈত্যা
    লীলাৱিলাসগতিভিঃ সমদাঃ সুধাং তাম্॥ **29.4**॥

অস্মাস্ৱিযং প্রণযিনীত্যসুরেষু তেষু
    জোষং স্থিতেষ্ৱথ সমাপ্য সুধাং সুরেষু।

ৎৱং ভক্তলোকৱশগো নিজরূপমেত্য
স্ৱর্ভানুমর্ধপরিপীতসুধং ৱ্যলাৱীঃ ॥ **29.5** ॥

ৎৱত্তঃ সুধাহরণযোগ্যফলং পরেষু
দৎৱা গতে ৎৱযি সুরৈঃ খলু তে ৱ্যগৃহ্ণন্।
ঘোরেঽথ মূর্ছতি রণে বলিদৈত্যমাযা -
ৱ্যামোহিতে সুরগণে ৎৱমিহাৱিরাসীঃ ॥ **29.6** ॥

ৎৱং কালনেমিমথ মালিমুখাঞ্জঘন্থ
শক্রো জঘান বলিজম্ভৱলান্ সপাকান্।
শুষ্কার্দ্রদুষ্করৱধে নমুচৌ চ লূনে
ফেনেন নারদগিরা ন্যরুণো রণং ৎৱম্ ॥ **29.7** ॥

যোষাৱপুর্দনুজমোহনমাহিতং তে
শ্রুৎৱা ৱিলোকনকুতূহলৱান্ মহেশঃ।
ভূতৈস্সমং গিরিজযা চ গতঃ পদং তে
স্তুৎৱাঽব্রৱীদভিমতং ৎৱমথো তিরোধাঃ ॥ **29.8** ॥

আরামসীমনি চ কন্দুকঘাতলীলা -
লোলাযমাননযনাং কমনীং মনোজ্ঞাম্।
ৎৱামেষ ৱীক্ষ্য ৱিগলদ্ৱসনাং মনোভূ -
ৱেগাদনঙ্গরিপুরঙ্গ সমালিলিঙ্গ ॥ **29.9** ॥

ভূযোঽপি ৱিদ্রুতৱতীমুপধাৱ্য দেৱো
ৱীর্যপ্রমোক্ষৱিকসৎপরমার্থবোধঃ।
ৎৱন্মানিতস্তৱ মহত্ত্ৱমুৱাচ দেৱ্যৈ
তত্তাদৃশস্ত্ৱমৱ ৱাতনিকেতনাথ ॥ **29.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনত্রিংশং দশকং সমাপ্তম্ ॥